# hayagrIvasahasranamastotram

# શ્રીહયગ્રીવસહસ્રનામસ્તોત્રમ્

## Document Information

Text title : shrI hayagrIva sahasranAmastotra

File name : hayagrIvasahasranAmastotra.itx

Category : sahasranAma, vishhnu, vishnu_misc, vishnu

Location : doc_vishhnu

Proofread by : DPD, NA

Source : Stotraratnakaram I, Madras 1927, p 305-327

Latest update : November 6, 2015

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 22, 2023

*sanskritdocuments.org*

# શ્રીહયગ્રીવસહસ્રનામસ્તોત્રમ્

॥ શ્રીઃ ॥

શુક્લામ્બરધરં વિષ્ણું શશિવર્ણં ચતુર્ભુજં
પ્રસન્નવદનં ધ્યાયેત્સર્વવિઘ્નોપશાન્તયે ।
યસ્ય દ્વિરદવક્ત્રાદ્યાઃ પારિષદ્યાઃ પરશ્શતં
વિઘ્નં નિઘ્નન્તિ સતતં વિષ્વક્સેનં તમાશ્રયે ॥

શ્રીકાશ્યપઃ -
તાત મે શ્રીહયગ્રીવનામ્નાં સાહસ્રમુત્તમમ્ ।
અધ્યેતું જાયતે કાઙ્ક્ષા તત્પ્રસીદ મયિ પ્રભો ॥ ૧॥

ઇતિપૃષ્ટસ્તતોવાચ બ્રહ્મા લોક પિતામહઃ ।
શ્રેયસામપિ ચ શ્રેયઃ કાશ્યપેહ વિશામ્પતે ॥ ૨॥

અમત્યા વિહિતં પાપં મૂલતો હિ વિનશ્યતિ ।
રહસ્યાનાં રહસ્યં ચ પાવનાનાં ચ પાવનમ્ ॥ ૩॥

પ્રાયશ્ચિત્તે કૃતે તસ્ય કર્તાન નિરયી ભવેત્ ।
કામતસ્તુ કૃતે પાપે પ્રાયશ્ચિત્તશતેન ચ ॥ ૪॥

તન્ન નશ્યતિ તત્કર્તા વ્યવહાર્યસ્તુ જાયતે ।
એવં દુરપનોદાનાં બુદ્ધિપૂર્વમહાંહસામ્ ॥ ૫॥

આવર્જનકરાણામપ્યન્તે નિષ્કૃતિરીરિતા ।
પ્રણમ્ય માનવતયા મન્ત્રરત્નાનુકીર્તનમ્ ॥ ૬॥

હંસનામસહસ્રસ્યપઠનં શિરસાન્વહમ્ ।
પ્રણમ્ય ભગવદ્ભક્તપાદોદક નિષેવણમ્ ॥ ૭॥

તદેતત્ત્રિતયં સર્વપાપસઙ્ઘાતનાશનમ્ ।
ઇતીદં પરમં ગુહ્યં હંસો હયશિરાહરિઃ ॥ ૮॥

વેદોપદેશસમયે માં નિબોધ્યોપદિષ્ટવાન ।
અનેન મન્ત્રરત્નેન મહાશ્વશિરસો હરેઃ ॥ ૯॥

સહસ્રનામભિસ્તુલ્યા નિષ્કૃતિર્નેતરાંહસામ્ ।
અનન્યભગવદ્ભક્તપાદોદકનિષેવણમ્ ॥ ૧૦॥

એતદ્દ્વયોપદેશાઙ્ગમાદૌ સ્વીકાર્યમિષ્યતે ।
ઇત્યુક્ત્વાઽનન્તગરુડવિષ્વક્સેનપદોદકમ્ ॥ ૧૧॥

આદૌ માં પ્રાશયન્નન્તે પરિશોષ્યેકૃતાંહસિ ।
આત્મનો નામસાહસ્રં સર્ષિચ્છન્દોઽધિદૈવતમ્ ॥ ૧૨॥

સન્યાસમુદ્રિકાભેદં મહ્યં સાઙ્ગમુપાદિશત્ ।
યથાવત્તદિદં વત્સ દદ્યાં તે શ‍ૃણુ તત્ત્વતઃ ॥ ૧૩॥

યત્પ્રાપ્યાત્યન્તિકી વૃત્ત્યા નિવૃત્ત્યા મોક્ષમેષ્યતિ ।
હયાસ્યનામસાહસ્રસ્તોત્રરાજસ્ય વૈભવમ્ ॥ ૧૪॥

ઋષિશ્શ્રીમાન્ હયગ્રીવો વિદ્યામૂર્તિસ્સ્વયં હરિઃ ।
દેવતા ચ સ એવાસ્ય છન્દોનુષ્ટુબિતિ શ્રુતમ્ ॥ ૧૫॥

હંસો હંસોઽહમિત્યેતે બીજં શક્તિસ્તુકીલકમ્ ।
હંસીં હંસોઽહમિત્યેતે પ્રાગ્જપ્યા મનવસ્ત્રયઃ ॥ ૧૬॥

એકૈકસ્ય દશાવૃત્તિરિતિસઙ્ખ્યાવિધીયતે ।
પ્રણવત્રયમન્ત્રં સ્યાત્કવચં શ્રીશ્શ્રિયો ભવેત્ ॥ ૧૭॥

શ્રીવિભૂષણ ઇત્યેતદ્ધૃદયં પરિકીર્તિતમ્ ।
પરોરજાઃ પરં બ્રહ્મેત્યપિ યોનિરુદાહૃતા ॥ ૧૮॥

વિદ્યામૂર્તિરિતિ ધ્યાનં વિશ્વાત્મેતિ ચ ગદ્યતે ।
વિશ્વમઙ્ગલનામ્નોઽસ્ય વિનિયોગો યથારુચિ ॥ ૧૯॥

ભ્રૂનેત્રાશ્રોત્રનાસાહન્વોષ્ઠતાલૂરદે ક્રમાત્ ।
ષોડશસ્વરવિન્યાસો દક્ષિણારમ્ભમિષ્યતે ॥ ૨૦॥

જિહ્વાતલેઽપિ તન્મૂલે સ્વરાવન્ત્યૌ ચ વિન્યસેત્ ।
તદા તાલુદ્વયન્યાસસખાયોસ્તુ પરિત્યજેત્ ॥ ૨૧॥

અયં હિ વિદ્યાકામાનામાદ્યસ્ત્વન્ય ફલૈષિણામ્ ।
દોઃપત્સક્થ્યઙ્ગુલીશીર્ષે વર્ગાન્કચટતાન્ન્યસેત્ ॥ ૨૨॥

પાર્શ્વયોસ્તુ વફૌ પૃષ્ટોદરયોસ્તુ બભૌ ન્યસેત્ ।
મકારં હૃદયે ન્યસ્ય જીવે વા પઞ્ચવિંશકે ॥ ૨૩॥

નાભિપાયૂદરે ગુહ્યે યરલવાન્વિનિક્ષિપેત્ ।
શષૌ કુણ્ડલયોશ્શીર્ષં હારે ચ કટિસૂત્રકે ॥ ૨૪॥

સહૌ હૃદબ્જે હર્દે ચ લમાપાદશિખે ન્યસેત્ ।
ક્ષઞ્ચ શીર્ષાદિ પાદાન્તં માતૃકાન્યાસ એષ તુ ॥ ૨૫॥

અસ્ય શ્રીહયગ્રીવસહસ્રનામ સ્તોત્રમહામન્ત્રસ્ય શ્રીહયગ્રીવ ઋષિઃ ।
અનુષ્ટુપ્ છન્દઃ । શ્રીહયગ્રીવ પરમાત્મા દેવતા । હંસ ઇતિ બીજમ્ ।
હંસોહમિતિ શક્તિઃ । હંસાં હંસીમિતિ કીલકમ્ । ૐ ૐ ઓમિત્યસ્ત્રમ્ ।
શ્રીઃ શ્રિયઃ ઇતિ કવચમ્ । શ્રીવિભૂષણ ઇતિ હૃદયમ્ ।
પરોરજાઃ પરં બ્રહ્મેતિ યોનિઃ । વિદ્યામૂર્તિર્વિશ્વાત્મા ઇતિ ધ્યાનમ્ ।

હંસામઙ્ગુષ્ઠાભ્યાં નમઃ । હંસીં તર્જનીભ્યાં નમઃ ।
હંસૂં મધ્યમાભ્યાં નમઃ । હંસૈં અનામિકાભ્યાં નમઃ ।
હંસૌં કનિષ્ઠિકાભ્યાં નમઃ । હંસઃ કરતલકરપૃષ્ઠાભ્યાં નમઃ ।
એવં હૃદયાદિન્યાસઃ ॥

હંસાં જ્ઞાનાય હૃદયાય નમઃ । હંસીં ઐશ્વર્યાય શિરસે સ્વાહા ।
હંસૂં શક્ત્યૈ શિખાયૈ વષટ્ । હંસૈં બલાય કવચાય હું ।
હંસૌં તેજસે નેત્રાભ્યાં વૌષટ્ ।
હંસઃ વીર્યાયાસ્ત્રાય ફટ્ ઓમિતિ દિગ્બન્ધઃ ॥

અથ માતૃકાન્યાસઃ -
ૐ અમ્ આમ્ ભ્રુવોઃ । ઇમ્ ઈમ્ નેત્રયોઃ । ઉમ્ ઊમ્ શ્રોત્રયોઃ । ઋમ્ ૠમ્ નાસિકયોઃ ।
ૡમ્ ૡમ્ કપોલયોઃ । એમ્ ઐમ્ ઓષ્ઠયોઃ । ૐ ઔમ્ દન્તપઙ્ક્ત્યોઃ ।
અમ્ જિહ્વાતલે । અઃ જિહ્વામૂલે ।
કવર્ગં દક્ષિણે બાહૂમૂલે કૂર્પરે મણિબન્ધે કરતલે હસ્તાગ્રે ।
ચવર્ગં વામે બાહૂમૂલે કૂર્પરે મણિબન્ધે કરતલે હસ્તાગ્રે ।
ટવર્ગં દક્ષિણે પાદમૂલે જાનુનિ પાદપાર્ષ્ણૌ પાદતલે પાદાગ્રે ।
તવર્ગં વામે પાદમૂલે જાનુનિ પાદપાર્ષ્ણૌ પાદતલે પાદાગ્રે ।
પફૌ પાર્શ્વયોઃ । બભૌ પૃષ્ઠોદરયોઃ । મં હૃદિ ।
યં રં લં વં નાભૌ પાયૌ ઉદરે ગુહ્યે । શષૌ હસ્તયોઃ ।

સહૌ શીર્ષે કટ્યામ્ । લક્ષ્મૌ હૃદબ્જે હાર્દે ઉતિ માતૃકાન્યાસઃ ॥

અથ ધ્યાનમ્ ॥

વિદ્યામૂર્તિમખણ્ડચન્દ્રવલયશ્વેતારવિન્દસ્થિતં
હૃદ્યાભં સ્ફટિકાદ્રિનિર્મલતનું વિદ્યોતમાનંશ્રિયા ।
વામાઙ્કસ્થિતવલ્લભાં પ્રતિ સદાવ્યાખ્યાન્તમામ્નાયવા-
ગર્થાનાદિમપૂરુષં હયમુખં ધ્યાયામિ હંસાત્મકમ્ ॥ ૧॥

વિશ્વાત્મા વિશદપ્રભાપ્રતિલસદ્વાગ્દેવતામણ્ડલો
દેવો દક્ષિણપાણિયુગ્મવિલસદ્બોધાઙ્કચક્રાયુધઃ ।
વામોદગ્રકરે દરં તદિતરેણાશ્લિષ્ય દોષ્ણા રમાં
હસ્તાગ્રે ધૃતપુસ્તકસ્સ દયતાં હંસો હિરણ્યચ્છદઃ ॥ ૨॥

અથ સહસ્રનામસ્તોત્રપ્રારમ્ભઃ ।
ૐ - શ્રીં હંસો હમૈ મોં ક્લીં શ્રીશ્શ્રિયશ્શ્રીવિભૂષણઃ ।
પરોરજાઃ પરં બ્રહ્મ ભૂર્ભુવસ્સુવરાદિમઃ ॥ ૧॥

ભાસ્વાન્ભગશ્ચ ભગવાન્સ્વસ્તિસ્વાહા નમસ્સ્વધા ।
શ્રૌષડ્વૌષઢલં હું ફટ્ હું હ્રીં ક્રોં ક્ષ્લૌં યથા તથા ॥ ૨॥

કર્કગ્રીવઃ કલાનાથઃ કામદઃ કરુણાકરઃ ।
કમલાધ્યુષિતોત્સઙ્ગઃ ક્ષયે કાલીવશાનુગઃ ॥ ૩॥

નિષચ્છોપનિષચ્ચાથ નીચૈરુચ્ચૈસ્સમં સહ ।
શશ્વદ્યુગપદહ્નાય શનૈરેકો બહુધ્રુવઃ ॥ ૪॥

ભૂતભૃદ્ભૂરિદસ્સાક્ષી ભૂતાદિઃ પુણ્યકીર્તનઃ ।
ભૂમા ભૂમિરધોન્નદ્ધઃ પુરુહૂતઃ પુરુષ્ટુતઃ ॥ ૫॥

પ્રફુલ્લપુણ્ડરીકાક્ષઃ પરમેષ્ઠી પ્રભાવનઃ ।
પ્રભુર્ભગઃસતાં બન્ધુર્ભયધ્વંસી ભવાપનઃ ॥ ૬॥

ઉદ્યન્નુરુશયાહું ફૃદુરુગાય ઉરુક્રમઃ ।
ઉદારસ્ત્રિયુગસ્ત્ર્યાત્મા નિદાનં નલયો હરિઃ ॥ ૭॥

હિરણ્યગર્ભો હેમાઙ્ગો હિરણ્યશ્મશ્રુરીશિતા ।
હિરણ્યકેશો હિમહા હેમવાસા હિતૈષણઃ ॥ ૮॥

આદિત્યમણ્ડલાન્તસ્થો મોદમાનસ્સમૂહનઃ ।

સર્વાત્મા જગદાધારસ્સન્નિધિસ્સારવાન્સ્વભૂઃ ॥ ૯॥

ગોપતિર્ગોહિતો ગોમી કેશવઃ કિન્નરેશ્વરઃ ।
માયી માયાવિકૃતિકૃન્મહેશાનો મહામહાઃ ॥ ૧૦॥

મમા મિમી મુમૂ મૃમૄ મ્લુમ્લૂ મેમૈં તથૈવ ચ ।
મોમૌં બિન્દુર્વિસર્ગશ્ચ હ્રસ્વોદીર્ઘઃ પ્લુતસ્સ્વરઃ ॥ ૧૧॥

ઉદાત્તશ્ચાનુદાત્તશ્ચ સ્વરિતઃ પ્રચયસ્તથા ।
કં ખં ગં ઘં ઙં ચ ચં છં જં ઝં ઞં ટં ઠમેવ ચ ॥ ૧૨॥

ડં ઢં ણં તં થં ચ દં ચ ધં નં પં ફં બમેવ ચ
ભં મં યં રં લં ચ વં ચ શં ષં સં હં ળમેવ ચ ॥ ૧૩॥

ક્ષં યમોં વ્યઞ્જનો જિહ્વામૂલીયોઽર્ધવિસર્ગવાન્ ।
ઉપધ્માનીય ઇતિ ચ સંયુક્તાક્ષર એવ ચ ॥ ૧૪॥

પદં ક્રિયા કારકશ્ચ નિપાતો ગતિરવ્યયઃ ।
સન્નિધિર્યોગ્યતાઽઽકાઙ્ક્ષા પરસ્પરસમન્વયઃ ॥ ૧૫॥

વાક્યં પદ્યં સમ્પ્રદાયો ભાવશ્શબ્દાર્થલાલિતઃ ।
વ્યઞ્જના લક્ષણા શક્તિઃ પાકો રીતિરલઙ્કૃતિઃ ॥ ૧૬॥

શય્યા ઙ્ક્રૌઢધ્વનિસ્તદ્વત્કાવ્યં સર્ગઃ ક્રિયા રુચિઃ ।
નાનારૂપપ્રબન્ધશ્ચ યશઃ પુણ્યં મહદ્ધનમ્ ॥ ૧૭॥

વ્યવહારપરિજ્ઞાનં શિવેતરપરિક્ષયઃ ।
સદ્યઃ પરમનિર્વાણં પ્રિયપથ્યોપદેશકઃ ॥ ૧૮॥

સંસ્કારઃ પ્રતિભા શિક્ષા ગ્રહણં ધારણં શ્રમઃ ।
આસુતાસ્વાદિમા ચિત્રં વિસ્તારશ્ચિત્રસંવિધિઃ ॥ ૧૯॥

પુરાણમિતિહાસશ્ચ સ્મૃતિસૂત્રં ચ સંહિતા ।
આચાર આત્મના તુષ્ટિરાચાર્યાજ્ઞાનતિક્રમઃ ॥ ૨૦॥

શ્રીમાન્શ્રીગીઃશ્રિયઃ કાન્તશ્શ્રીનિધિશ્શ્રીનિકેતનઃ ।
શ્રેયાન્હયાનનશ્રીદશ્શ્રીમયશ્શ્રિતવત્સલઃ ॥ ૨૧॥

હંસશ્શુચિષદાદિત્યો વસુશ્ચન્દ્રોઽન્તરિક્ષસત્ ।
હોતા ચ વેદિષદ્યોનિરતિથિર્દ્રોણસદ્ધવિઃ ॥ ૨૨॥

નૃષન્મૃત્યુશ્ચ વરસદમૃતં ચર્તસદ્વૃષઃ ।
વ્યોમસદ્દ્વિવિધસ્ફોટશબ્દાર્થવ્યઙ્ગ્યવૈભવઃ ॥ ૨૩॥

અબ્જા રસસ્વાદુતમો ગોજા ગેયો મનોહરઃ ।
ઋતજાસ્સકલં ભદ્રમદ્રિજાસ્થૈર્યમુત્તમમ્ ॥ ૨૪॥

ઋતં સમજ્ઞાત્વનૃતં બૃહત્સૂક્ષ્મવશાનુગઃ ।
સત્યં જ્ઞાનમનન્તં યત્તત્સદ્બ્રહ્મમયોઽચ્યુતઃ ॥ ૨૫॥

અગ્રેભવન્નગો નિત્યઃ પરમઃ પુરુષોત્તમઃ ।
યોગનિદ્રાપરસ્સ્વામી નિધ્યાનવરનિર્વૃનઃ ॥ ૨૬॥

રસો રસ્યો રસયિતા રસવાન્ રસિકપ્રિયઃ ।
આનન્દો નન્દયન્સર્વાનાનન્દી હયકન્ધરઃ ॥ ૨૭॥

કાલઃ કાલ્યશ્ચ કાલાત્મા કાલાભ્યુત્થિતજાગરઃ ।
કલાસાચિવ્યકૃત્કાન્તાકથિતવ્યાધિકાર્યકઃ ॥ ૨૮॥

દૃઙ્ન્યગ્ચનોદગ્ચનોધલ્લયસર્ગો લઘુક્રિયઃ ।
વિદ્યાસહાયો વાગીશો માતૃકામણ્ડલીકુતઃ ॥ ૨૯॥

હિરણ્યં હંસમિથુનમીશાનશ્શક્તિમાન્ જયી ।
ગ્રહમેથી ગુણી શ્રીભૂનીલાલીલૈકલાલસ ॥ ૩૦॥

અઙ્કેનોદૂહ્ય વાગ્દેવીમાચાર્યકમુપાશ્રયઃ ।
વેદવેદાન્તશાસ્ત્રાર્થતત્ત્વવ્યાખ્યાનતત્પરઃ ॥ ૩૧॥

લ્હૌં હ્લૌં હં હં હયો હં સૂં હંસાં હંસીં હસૂં હસૌમ્ ।
હસૂં હં હરિણો હારી હરિકેશો હરેડિતઃ ॥ ૩૨॥

સનાતનો નિર્બીજસ્સન્નવ્યક્તો હૃદયેશયઃ ।
અક્ષરઃ ક્ષરજીવેશઃ ક્ષમી ક્ષયકરોઽચ્યુતઃ ॥ ૩૩॥

કર્તાકારયિતાઽકાર્યં કારણં પ્રકૃતિઃ કૃતિઃ ।
ક્ષયક્ષયમનામાર્થો વિષ્ણુર્જિષ્ણુર્જગન્મયઃ ॥ ૩૪॥

સઙ્કુચન્વિકચન્સ્થાણુનિર્વિકારો નિરામયઃ ।
શુદ્ધો બુદ્ધઃ પ્રબુદ્ધશ્ચ સ્નિગ્ધો મુગ્ધસ્સમુદ્ધતઃ ॥ ૩૫॥

સઙ્કલ્પદો બહુભવત્સર્વાત્મા સર્વનામભૃત્ ।
સહસ્રશીર્ષસ્સર્વજ્ઞસ્સહસ્રાક્ષસ્સહસ્રપાત્ ॥ ૩૬॥

વ્યક્તોવિરાટ્સ્વરાટ્સમ્રાડ્વિષ્વગ્રૂપવપુર્વિધુઃ ।
માયાવી પરમાનન્દો માન્યો માયાતિગો મહાન્ ॥ ૩૭॥

વટપત્રશયો બાલો લલન્નામ્નાયસૂચકઃ ।
મુખન્યસ્તકરગ્રસ્તપાદાગ્રપટલઃ પ્રભુઃ ॥ ૩૮॥

નૈદ્રીહાસાશ્વસમ્ભૂતજ્ઞાજ્ઞસાત્ત્વિકતામસઃ ।
મહાર્ણવામ્બુપર્યઙ્કુઃ પદ્મનાભઃ પરાત્પરઃ ॥ ૩૯॥

બ્રહ્મભૂર્બ્રહ્મભયહૃદ્ધરિરોમુપદેશકૃત્ ।
મધુકૈટભનિર્માતા મત્તબ્રહ્મમદાપહઃ ॥ ૪૦॥

વેધોવિલાસવાગાનિર્દયાસારો મૃષાર્થદઃ ।
નારાયણાસ્ત્રનિર્માતામધુકૈટભમર્દનઃ ॥ ૪૧॥

વેદકર્તા વેદભર્તા વેદહર્તા વિદાંવરઃ ।
પુઙ્ખાનુપુઙ્ખહેષાઢ્યઃ પૂર્ણષાડ્ગુણ્યવિગ્રહઃ ॥ ૪૨॥

લાલામૃતકણવ્યાજવાન્તનિર્દોષવર્ણકઃ ।
ઉલ્લોલસ્વાનધીરોદ્યદુચ્ચૈર્હલહલધ્વનિઃ ॥ ૪૩॥

કર્ણાદારભ્ય કલ્ક્યાત્મા કવિઃ ક્ષીરાર્ણવોપમઃ ।
શઙ્ખ ચક્રગદી ખડ્ગી શાર્ઙ્ગી નિર્ભયમુદ્રકઃ ॥ ૪૪॥

ચિન્મુદ્રાચિહ્નિતો હસ્તતલવિન્યસ્તપુસ્તકઃ ।
વિદ્યાનામ્નીં શ્રિયં શિષ્યાં વેદયન્નિજવૈભવમ્ ॥ ૪૫॥

અષ્ટાર્ણ્યર્મ્યોઽષ્ટભુજોવ્યષ્ટિસૃષ્ટિકરઃ પિતા ।
અષ્ટૈશ્વર્યપ્રદોહૃષ્યદષ્ટમૂર્તિપિતૃસ્તુતઃ ॥ ૪૬॥

અનીતવેદપુરુષો વિધિવેદોપદેશકૃત્ ।
વેદવેદાઙ્ગવેદાન્તપુરાણસ્મૃતિમૂર્તિમાન્ ॥ ૪૭॥

સર્વકર્મસમારાધ્યસ્સર્વવેદમયો વિભુઃ ।
સર્વાર્થતત્ત્વવ્યાખ્યાતા ચતુષ્ષષ્ટિકલાધિપઃ ॥ ૪૮॥

શુભયુક્સુમુખશ્શુદ્ધસ્સુરૂપસ્સુગતસ્સુધીઃ ।
સુવ્રતિસ્સંહૃતિશ્શૂરસ્સુતપાઃ સુષ્ટુતિસ્સુહૃત્ ॥ ૪૯॥

સુન્દરસ્સુભગસ્સૌમ્યસ્સુખદસ્સુહૃદાં પ્રિયઃ ।

સુચરિત્રસ્સુખતરશ્શુદ્ધસત્વપ્રદાયકઃ ॥ ૫૦॥

રજસ્તમોહરો વીરોવિશ્વરક્ષાધુરન્ધરઃ ।
નરનારાયણાકૃત્યા ગુરુશિષ્યત્વમાસ્થિતઃ ॥ ૫૧॥

પરાવરાત્મા પ્રબલઃ પાવનઃ પાપનાશનઃ ।
દયાઘનઃ ક્ષમાસારો વાત્સલ્યૈકવિભૂષણઃ ॥ ૫૨॥

આદિકૂર્મો જગદ્ભર્તા મહાપોત્રી મહીધરઃ ।
સ્તદ્ભિત્સ્વામી હરિર્યક્ષો હિરણ્યરિપુરૈચ્છિકઃ ॥ ૫૩॥

પ્રહ્લાદપાલકસ્સર્વભયહર્તા પ્રિયંવદઃ ।
શ્રીમુખાલોકનસ્રંસત્ક્રૌઞ્ચકઃ કુહકાઞ્ચનઃ ॥ ૫૪॥

છત્રી કમણ્ડલુધરો વામનો વદતાં વરઃ ।
પિશુનાત્મા શનોદૃષ્ટિલોપનો બલિમર્દનઃ ॥ ૫૫॥

ઉરુક્તમો બલિશિરોન્યસ્તાઙ્ઘ્રિર્બલિમર્દનઃ ।
જામદગ્ન્યઃ પરશુભૃત્કૃત્તક્ષત્રકુલોત્તમઃ ॥ ૫૬॥

રામોઽભિરામશ્શાન્તાત્મા હરકોદણ્ડખણ્ડનઃ ।
શરણાગતસન્ત્રાતા સર્વાયોધ્યકમુક્તિદઃ ॥ ૫૭॥

સઙ્કર્ષણોમદોદગ્રો બલવાન્મુસલાયુધઃ ।
કૃષ્ણાક્લેશહરઃ કૃષ્ણો મહાવ્યસનશાન્તિદઃ ॥ ૫૮॥

અઙ્ગારિતોત્તરાગર્ભપ્રાણદઃ પાર્થસારથિઃ ।
ગીતાચાર્યો ધરાભારહારી ષટ્પુરમર્દનઃ ॥ ૫૯॥

કલ્કી વિષ્ણુયશસ્સૂનુઃ કલિકાલુષ્યનાશનઃ ।
સાધુદુષ્કૃત્પરિત્રાણવિનાશવિહિતોદયઃ ॥ ૬૦॥

વૈકુણ્ઠે પરમે તિષ્ઠન્ સુકુમારયુવાકૃતિઃ ।
વિશ્વોદયસ્થિતિધ્વંસસઙ્કલ્પેન સ્વયં પ્રભુઃ ॥ ૬૧॥

મદનાનાં ચ મદનો મણિકોટીરમાનિતઃ ।
મન્દારમાલિકાપીડો મણિકુણ્ડલમણ્ડિતઃ ॥ ૬૨॥

સુસ્નિગ્ધનીલકુટિલકુન્તલઃ કોમલાકૃતિઃ ।
સુલલાટસ્સ્તુતિલકસ્સુભ્રૂકસ્સુકપોલકઃ ॥ ૬૩॥

સિધ્દ્વાસદસદાલોકસુધાસ્યન્દીરદચ્છદઃ ।
તારકાકોરકાકારવિનિર્મિતરદચ્છદઃ ॥ ૬૪॥

સુધાવર્તિપરિસ્ફૂર્તિશોભમાનરદચ્છદઃ ।
વિષ્ટબ્ધોવિપુલગ્રીવોનિભૃતોચ્ચૈશ્શ્રવસ્થિતિઃ ॥ ૬૫॥

સમાવૃત્તાવદાતોરુમુક્તાપ્રાલમ્બભૂષણઃ ।
રત્નાઙ્ગદી વજ્રનિષ્કી નીલરત્નાઙ્કકઙ્કણઃ ॥ ૬૬॥

હરિન્મણિગણાબધ્દશૃઙ્ખલાકઙ્કણોર્મિકઃ ।
સિતોપવીતસંશ્લિષ્યત્પદ્માક્ષમણિમાલિકઃ ॥ ૬૭॥

શ્રીચૂર્ણવદ્દ્વાદશોર્ધ્વપુણ્ડ્રરેખાપરિષ્કૃતઃ ।
પટ્ટતન્તુગ્રથનવત્પવિત્રનરશોભિતઃ ॥ ૬૮॥

પીનવક્ષામહાસ્કન્ધો વિપુલોરુકટીતટઃ ।
કૌસ્તુભી વનમાલી ચ કાન્ત્યાચન્દ્રાયુતોપમઃ ॥ ૬૯॥

મન્દારમાલિકામોદી મઞ્જુવાગમલચ્છવિઃ ।
દિવ્યગન્ધો દિવ્યરસો દિવ્યતેજા દિવસ્પતિઃ ॥ ૭૦॥

વાચાલો વાક્પતિર્વક્તા વ્યાખ્યાતા વાદિનાં પ્રિયઃ ।
ભક્તહૃન્મધુરો વાદિજિહ્વાભદ્રાનનસ્થિતિઃ ॥ ૭૧॥

સ્મૃતિસન્નિહિતસ્સ્નિગ્ધસ્સિધ્દિદસિધ્દિસન્નુતઃ ।
મૂલકન્દોમુકુન્દોગ્લૌસ્સ્વયમ્ભૂશમ્ભુરૈન્દવઃ ॥ ૭૨॥

ઇષ્ટો મનુર્યમઃ કાલકાલ્યઃ કમ્બુકલાનિધિઃ ।
કલ્યઃ કામયિતા ભીમઃ કાતર્યહરણઃ કૃતિઃ ॥ ૭૩॥

સમ્પ્રિયઃ પક્કણસ્તર્કચર્ચાનિર્ધારણાદયઃ ।
વ્યતિરેકો વિવેકશ્ચ પ્રવેકઃ પ્રક્રમઃ ક્રમઃ ॥ ૭૪॥

પ્રમાણ પ્રતિભૂઃ પ્રાજ્ઞઃ પ્રજ્ઞાપત્થ્યાચધારણઃ ।
વિધિર્વિધાતા વ્યવધિરુદ્ભવઃ પ્રભવસ્થિતિઃ ॥ ૭૫॥

વિષયસ્સંશયઃ પૂર્વઃ પક્ષઃ કક્ષ્યોપપાદકઃ ।
રાધ્દાન્તો વિહિતો ન્યાયફલનિષ્પત્તિરુદ્ભવઃ ॥ ૭૬॥

નાનારૂપાણિ તન્ત્રાણિ વ્યવહાર્યો વ્યવસ્થિતિઃ ।
સર્વસાધારણો દેવસ્સાધ્વસાધુહિતે રતઃ ॥ ૭૭॥

સન્ધા સનાતનો ધર્મો ધર્મૈરર્ચ્યો મહાત્મભિઃ ।
છન્દોમયસ્ત્રિધામાત્મા સ્વચ્છન્દશ્છાન્દસેડિતઃ ॥ ૭૮॥

યજ્ઞો યજ્ઞાત્મકો યષ્ટા યજ્ઞાઙ્ગોઽપઘનોહવિઃ ।
સમિદાજ્યં પુરોડાશશ્શાલા સ્થાલી સ્રુવસ્સ્રુચા ॥ ૭૯॥

પ્રાગ્વંશો દેવયજનઃ પરિધિશ્ચ પરિસ્તરઃ ।
વેદિર્વિહરણં ત્રેતા પશુઃ પાશશ્ચ સંસ્કૃતિઃ ॥ ૮૦॥

વિધિર્મન્ત્રોઽર્થવાદશ્ચ દ્રવ્યમઙ્ગં ચ દૈવતમ્ ।
સ્તોત્રં શસ્ત્રં સામ ગીતિરુદ્ગીથસ્સર્વસાધનમ્ ॥ ૮૧॥

યાજ્યા પુરોનુકાવ્યા ચ સામિધેની સમૂહનમ્ ।
પ્રયોક્તારઃ પ્રયોગશ્ચ પ્રપઞ્ચઃ પ્રાશુભા શ્રમઃ ॥ ૮૨॥

શ્રદ્ધા પ્રધ્વંસના તુષ્ટિઃ પુષ્ટિઃ પુણ્યં પ્રતિર્ભવઃ ।
સદસ્સદસ્યસમ્પાતઃ પ્રશ્નઃ પ્રતિવચસ્થિતિઃ ॥ ૮૩॥

પ્રાયશ્ચિત્તં પરિષ્કારો ધૃતિર્નિર્વહણં ફલમ્ ।
નિયોગો ભાવના ભાવ્યં હિરણ્યં દક્ષિણા નુતિઃ ॥ ૮૪॥

આશીરભ્યુપપત્તિશ્ચ તૃપ્તિસ્સ્વં શર્મ કેવલમ ।
પુણ્યક્ષયઃ પુનઃ પાતભયં શિક્ષાશુગર્દનઃ ॥ ૮૫॥

કાર્પણ્યં યાતનાં ચિન્તા નિર્વેદશ્ચ વિહસ્તતા ।
દેહભૃત્કર્મસમ્પાતઃ કિઞ્ચિત્કર્માનુકૂલકઃ ॥ ૮૬॥

અહેતુકતયા પ્રેમ સામ્મુખ્યં ચાપ્યનુગ્રહઃ ।
શુચિશ્રીમત્કુલજનો નેતા સત્ત્વાભિમાનવાન્ ॥ ૮૭॥

અન્તરાયહરઃ પિત્રોરદુષ્ટાહારદાયકઃ ।
શુદ્ધાહારાનુરૂપાઙ્ગપરિણામવિધાયકઃ ॥ ૮૮॥

સ્રાવપાતાદિવિપદાં પરિહર્તા પરાયણઃ ।
શિરઃપાણ્યાદિસન્ધાતા ક્ષેમકૃત્પ્રાણદઃ પ્રભુ ॥ ૮૯॥

અનિર્ઘૃણશ્ચાવિષમશ્શક્તિત્રિતયદાયકઃ ।
સ્વેચ્છાપ્રસઙ્ગસમ્પત્તિવ્યાજહર્ષવિશેષવાન્ ॥ ૯૦॥

સંવિત્સન્ધાયકસ્સર્વજન્મક્લેશસ્મૃતિપ્રદઃ ।

વિવેકેશોકવૈરાગ્યભવભીતિવિધાયકઃ ॥ ૯૧॥

ગર્ભસ્યાપ્યનુકૂલાદિનાસાન્તાધ્યવસાયદઃ ।
શુભવૈજનનોપેતસદનેહોજનિપ્રદઃ ॥ ૯૨॥

ઉત્તમાયુઃપ્રદો બ્રહ્મનિષ્ઠાનુગ્રહકારકઃ ।
સ્વદાસજનનિસ્તીર્ણતદ્વંશજપરમ્પરઃ ॥ ૯૩॥

શ્રીવૈષ્ણવોત્પાદકૃતસ્વસ્તિકાવનિમણ્ડલઃ ।
અધર્વણોક્તૈકશતમૃત્યુદૂરક્રિયાપરઃ ॥ ૯૪॥

દયાદ્યષ્ટગુણાધાતા તત્તત્સંસ્કૃતિસાધકઃ ।
મેધાવિધાતા શ્રદ્ધાકૃત્ સૌસ્થ્યદો જામિતાહરઃ ॥ ૯૫॥

વિઘ્નનુદ્વિજયી ધાતા દેશકાલાનુકૂલ્યકૃત્ ।
વિનેતા સત્પથાનેતા દોષહૃચ્છુભદસ્સખા ॥ ૯૬॥

હ્રીદો ભીદો રુચિકરો વિશ્વો વિશ્વહિતે રતઃ ।
પ્રમાદહૃત્પ્રામકારી પ્રદ્યુમ્નો બલવત્તરઃ ॥ ૯૭॥

સાઙ્ગવેદસમાયોક્તા સર્વશાસ્ત્રાર્થવિત્તિદઃ ।
બ્રહ્મચર્યાન્તરાયઘ્નઃ પ્રિયકૃદ્ધિતકૃત્પરઃ ॥ ૯૮॥

ચિત્તશુદ્ધિપ્રદશ્છિન્નાક્ષચાપલ્યઃ ક્ષમાવહઃ ।
ઇન્દ્રિયાર્થારતિચ્છેત્તા વિદ્યૈકવ્યસનાવહઃ ॥ ૯૯॥

આત્માનુકૂલ્યરુચિકૃદખિલાર્તિવિનાશકઃ ।
તિતીર્ષુહૃત્ત્વરાવેદી ગુરુસદ્ભક્તિતેજસઃ ॥ ૧૦૦॥

ગુરુસમ્બન્ધઘટકો ગુરુવિશ્વાસવર્ધનઃ ।
ગુરૂપાસનસન્ધાતા ગુરુપ્રેમપ્રવર્ધનઃ ॥ ૧૦૧॥

આચાર્યાભિમતૈર્યોક્તા પઞ્ચસંસ્કૃતિભાવનઃ ।
ગુરૂક્તવૃત્તિનૈશ્ચલ્યસન્ધાતાઽવહિતસ્થિતિઃ ॥ ૧૦૨॥

આપન્નાખિલરક્ષાર્થમાચાર્યકમુપાશ્રિતઃ ।
શાસ્ત્રપાણિપ્રદાનેન ભવમગ્નાન્સમુદ્ધરન્ ॥ ૧૦૩॥

પાઞ્ચકાલિકધર્મેષુ નૈશ્ચલ્યં પ્રતિપાદયન્ ।
સ્વદાસારાધનાદ્યર્થશુદ્ધદ્રવ્યપ્રદાયકઃ ॥ ૧૦૪॥

ન્યાસવિદ્યાવિનિર્વોઢા ન્યસ્તાત્મભરરક્ષકઃ ।
સ્વકૈઙ્કર્યૈકરુચિદસ્સ્વદાસ્યપ્રેમવર્ધનઃ ॥ ૧૦૫॥

આચાર્યાર્થાખિલદ્રવ્યસમ્ભૃત્યર્પણરોચકઃ ।
આચાર્યસ્ય સ્વસચ્છિષ્યોજ્જીવનૈકરુચિપ્રદઃ ॥ ૧૦૬॥

આગત્યયોજયનાસહિતૈકકૃતિજાગરઃ ।
બ્રહ્મવિદ્યાસમાસ્વાદસુહિતઃ કૃતિસંસ્કૃતિઃ ॥ ૧૦૭॥

સત્કારે વિષધીદાતા તરુણ્યાં શવબુદ્ધિદઃ ।
સભામ્પ્રત્યાયયન્વ્યાલીં સર્વત્ર સમબુદ્ધિદઃ ॥ ૧૦૮॥

સમ્ભાવિતાશેષદોષહૃત્પુનર્ન્યાસરોચકઃ ।
મહાવિશ્વાસસન્ધાતા સ્થૈર્યદાતા મદાપહઃ ॥ ૧૦૯॥

નાદવ્યાખ્યાસ્વસિદ્ધાન્તરક્ષાહેતુસ્વમન્ત્રદઃ ।
સ્વમન્ત્રજપસંસિદ્ધિજઙ્ઘાલકવિતોદયઃ ॥ ૧૧૦॥

અદુષ્ટગુણવત્કાવ્યબન્ધવ્યામુગ્ધચેતનઃ ।
વ્યઙ્ગ્યપ્રધાનરસવદ્ગદ્યપદ્યાદિનિર્મિતિઃ ॥ ૧૧૧॥

સ્વભક્તસ્તુતિસન્તુષ્ટો ભૂયોભક્તિપ્રદાયકઃ ।
સાત્વિકત્યાગસમ્પન્નસત્કર્મકૃદતિપ્રિયઃ ॥ ૧૧૨॥

નિરન્તરાનુસ્મરણનિજદાસૈવાદાસ્યકૃત્ ।
નિષ્કામવત્સલો નૈચ્યભાવનેષુ વિનિર્વિશન્ ॥ ૧૧૩॥

સર્વભૂતભવદ્ભાવં સમ્પશ્યત્સુસદાસ્થિતઃ ।
કરણત્રયસારૂપ્યકલ્યાણપતિસાદરઃ ॥ ૧૧૪॥

કદા કદેતિ કૈઙ્કર્યકામિનાં શેષિતામ્ભજન ।
પરવ્યૂહાદિનિર્દોષશુભાશ્રયપરિગ્રહઃ ॥ ૧૧૫॥

ચન્દ્રમણ્ડલમધ્યસ્ય શ્વેતામ્ભોરુહવિષ્ટરઃ ।
જ્યોત્સ્નાયમાનાઙ્ગરુચિનિર્ધૂતાન્તર્બહિસ્તમાઃ ॥ ૧૧૬॥

ભાવ્યો ભાવયિતા ભદ્રં પારિજાતવનાલયઃ ।
ક્ષીરાબ્ધિમધ્યમદ્વીપપાલકઃ પ્રપિતામહઃ ॥ ૧૧૭॥

નિરન્તરનમોવાકશુદ્ધયાજિહદાશ્રયઃ ।
મુક્તિદશ્વેતમૃદ્રૂપશ્વેતદ્વીપવિભાવનઃ ॥ ૧૧૮॥

ગરુડાહારિતશ્વેતમૃત્પૂતયદુભૂધરઃ ।
ભદ્રાશ્વવર્ષનિલયો ભયહારી શુભાશ્રયઃ ॥ ૧૧૯ ॥

ભદ્રશ્રીવત્સહારાઢ્યઃ પઞ્ચરાત્રપ્રવર્તકઃ ।
ભક્તાત્મભાવભવનો હાર્દોઽઙ્ગુષ્ઠપ્રમાણવાન્ ॥ ૧૨૦ ॥

સ્વદાસસત્કૃતાકૃત્યે તન્મિત્રારિષુ યોજયન્ ।
પ્રાણાનુત્ક્રામયન્નૂરીકૃતપ્રારબ્ધલોપનઃ ॥ ૧૨૧ ॥

લધ્વ્યૈવ શિક્ષયાપાપમશેષમપિ નિર્ણુદન્ ।
ત્રિસ્થૂણક્ષોભતો ભૂતસૂક્ષ્મૈસ્સૂક્ષ્મવપુસ્સૃજન્ ॥ ૧૨૨ ॥

નિરઙ્કુશકૃપાપૂરો નિત્યકલ્યાણકારકઃ ।
મૂર્ધન્યનાડ્યા સ્વાન્દાસાન્બ્રહ્મરન્ધ્રાદુદઞ્ચયન્ ॥ ૧૨૩ ॥

ઉપાસનપરાન્સર્વાન્ પ્રારબ્ધમનુભાવયન્ ।
સર્વપ્રારબ્ધદેહાન્તેઽપ્યન્તિમસ્મરણં દિશન્ ॥ ૧૨૪ ॥

પ્રપેયુષાં ભેજુષાં ચ યમદૃષ્ટિમભાવયન્ ।
દિવ્યદેહપ્રદસ્સૂર્યં દ્વારયન્મોક્ષમેયુષામ્ ॥ ૧૨૫ ॥

આતિવાહિકસત્કારાનધ્વન્યાપાદ્ય માનયન્ ।
સાર્વાન્ક્રતુભુજશ્શશ્વત્પ્રાભૃતાનિ પ્રદાપયન્ ॥ ૧૨૬ ॥

દુરન્તમાયાકાન્તારં દ્રુતં યોગેન્ લઙ્ઘયન્ ।
સ્ફ્રાયત્સુદર્શવિવિધવીથ્યન્તેનાધ્વના નયન્ ॥ ૧૨૭ ॥

સીમાન્તસિન્ધુવિરજાં યોગેનોત્તારયન્વશી ।
અમાનવસ્ય દેવસ્ય કરં શિરસિ ધારયન્ ॥ ૧૨૮ ॥

અનાદિવાસનાં ધૂન્વન્ વૈકુણ્ઠાખ્યા સલોકયન્ ।
અહેયમઙ્ગલોદારતનુદાનાત્સરૂપયન ॥ ૧૨૯ ॥

સૂરિજુષ્ટં સુખૈકાન્તં પરમં પદમાપયન્ ।
અરારણ્યામૃતામ્ભોધી દર્શયન્ શ્રમનાશનઃ ॥ ૧૩૦ ॥

દિવ્યોદ્યાનસરોવાપીસરિન્મણિનગાન્નયન ।
ઐરમ્મદામૃતસરોગમયન્સૂપબૃંહણઃ ॥ ૧૩૧ ॥

અશ્વત્થં સોમસવનં પ્રાપયન્વિષ્ટરશ્રવાઃ ।

દિવ્યાપ્સરસ્સમાનીતબ્રહ્માલઙ્કારદાયકઃ ॥ ૧૩૨॥

દિવ્યવાસોઽઞ્જનક્ષૌમમાલ્યૈસ્સ્વાન્બહુમાનયન્ ।
સ્વીયામયોધ્યાં નગરીં સાદરં સમ્પ્રવેશયન્ ॥ ૧૩૩॥

દાસાન્દિવ્યરસાલોકગન્ધાંસલશરીરયન્ ।
સ્વદાસાન્સૂરિવર્ગેણ સસ્નેહં બહુમાનયન્ ॥ ૧૩૪॥

સૂરિસેવોદિતાનન્દનૈચ્યાન્સ્વાનતિશાયયન્ ।
વાચયન્સ્વાં નમોવીપ્સાં કુર્વન્પ્રહ્વાન્કૃતાઞ્જલીન્ ॥ ૧૩૫॥

પ્રાકારગોપુરારામપ્રાસાદેભ્યઃ પ્રણામયન્ ।
ઇન્દ્રપ્રજાપતિદ્વારપાલસમ્માનમાપયન્ ॥ ૧૩૬॥

માલિકાઞ્ચન્મહારાજવીથીમધ્યં નિવાસયન્ ।
શ્રીવૈકુણ્ઠપુરન્ધ્રીભિર્નાનાસત્કારકારકઃ ॥ ૧૩૭॥

દિવ્યં વિમાનં ગમયન્ બ્રહ્મકાન્ત્યાભિપૂરયન્ ।
મહાનન્દાત્મકશ્રીમન્મણિમણ્ડપમાપયન્ ॥ ૧૩૮॥

હૃષ્યત્કુમુદચણ્ડાદ્યૈર્વિષ્વક્સેનાન્તિકં નયન્ ।
સેનેશચોદિતાસ્થાનનાયકો હેતિનાયકઃ ॥ ૧૩૯॥

પ્રાપયન્દિવ્યમાસ્થાનં વૈનતેયં પ્રણામયન્ ।
શ્રીમત્સુન્દરસૂરીન્દ્રદિવ્યપઙ્ક્તિં પ્રણામયન્ ॥ ૧૪૦॥

ભાસ્વરાસનપર્યઙ્કપ્રાપણેન કૃતાર્થયન્ ।
પર્યઙ્કવિદ્યાસંસિદ્ધસર્વવૈભવસઙ્ગતઃ ॥ ૧૪૧॥

સ્વાત્માનમેવ શ્રીકાન્તં સાદરં ભૂરિ દર્શયન્ ।
શેષતૈકરતિં શેષં શય્યાત્માનં પ્રણામયન્ ॥ ૧૪૨॥

અનન્તાક્ષિદ્વિસાહસ્રસાદરાલોકપાત્રયન્ ।
અકુમારયુવાકારં શ્રીકાન્તં સમ્પ્રણામયન્ ॥ ૧૪૩॥

અતટાનન્દતો હેતો રઞ્ચયન્કિલિકિઞ્ચિતમ્ ।
દાસાનત્યુત્થિતમુહુઃકૃતિસૃષ્ટિપ્રસન્નહૃત્ ॥ ૧૪૪॥

શ્રીયાં પ્રાપસ્વયં તાતં જીવં પુત્રં પ્રહર્ષયન્ ।
મજ્જયન્ સ્વમુખામ્ભોધૌ સ્વકાં કીર્તિરુચિં દિશન્ ॥ ૧૪૫॥

દયાર્દ્રગઙ્ગાવલનાકૃતહ્લાદૈઃ કૃતાર્થયન્ ।
પર્યઙ્કારોહણપ્રહ્વે સમં લક્ષ્મ્યોપપાદયન્ ॥ ૧૪૬ ॥

કસ્ત્વમિત્યનુયુઞ્જાનો દાસોઽસ્મીત્યુક્તિવિસ્મિતઃ ।
અપૃથક્ત્વપ્રકારોઽસ્મિ વાચાસ્વાશ્રિતવદ્ભવન્ ॥ ૧૪૭ ॥

વિદુષાં તત્ક્રતુનયાદ્ધ્યાસ્યવપુષાભવન્ ।
વાસુદેવાત્મના ભૂયો ભવન્વૈકુણ્ઠનાયકઃ ॥ ૧૪૮ ॥

યથા તથૈવ સ્વં રૂપં જગન્મોહનમૂર્તિમાન્ ।
દ્વિમૂર્તી બહુમૂર્તીશ્ચ આત્મનશ્ચ પ્રકાશયન્ ॥ ૧૪૯ ॥

યુગપત્સકલં સાક્ષાત્સ્વતઃ કર્તું સમર્થયન્ ।
કવીનામાદિશન્નિત્યં મુક્તાનામાદિમઃ કવિઃ ॥ ૧૫૦ ॥

ષડર્ણમનુનિષ્ઠાનાં શ્વેતદ્વીપસ્થિતિં દિશન્ ।
દ્વાદશાક્ષરનિષ્ઠાનાં લોકં સાન્તાનિકં દિશન્ ॥ ૧૫૧ ॥

અષ્ટાક્ષરૈકનિષ્ઠાનાં કાર્યં વૈકુણ્ઠમર્પયન્ ।
શરણાગતિનિષ્ઠાનાં સાક્ષાદ્વૈકુણ્ઠમર્પયન્ ॥ ૧૫૨ ॥

સ્વમન્ત્રરાજનિષ્ઠાનાં સ્વસ્માદર્તિશયં દિશન્ ।
શ્રિયા ગાઢોપગૂઢાત્મા ભૂતધાત્રીરુચિં દિશન્ ॥ ૧૫૩ ॥

નીલાવિભૂતિવ્યામુગ્ધો મહાશ્વેતાશ્વમસ્તકઃ ।
ત્ર્યક્ષસ્ત્રિપુરસંહારી રુદ્રસ્સ્કન્દો વિનાયકઃ ॥ ૧૫૪ ॥

અજો વિરિઞ્ચો દ્રુહિણો વ્યાપ્તમૂર્તિરમૂર્તિકઃ ।
અસઙ્ગોઽનન્યધીસઙ્ગવિહઙ્ગોવૈરિભઙ્ગદઃ ॥ ૧૫૫ ॥

સ્વામી સ્વં સ્વેન સન્તુષ્યન્ શક્રસ્સર્વાધિકસ્યદઃ ।
સ્વયંજ્યોતિસ્સ્વયંવૈદ્યશ્શૂરશ્શૂરકુલોદ્ભવઃ ॥ ૧૫૬ ॥

વાસવો વસુરણ્યોગ્નિર્વાસુદેવસ્સુહૃદ્વસુઃ ।
ભૂતો ભાવી ભવન્ભવ્યો વિષ્ણુસ્થાનસ્સનાતનઃ ॥ ૧૫૭ ॥

નિત્યાનુભાવો નેદીયાન્દવીયાન્દુર્વિભાવનઃ ।
સનત્કુમારસ્સન્ધાતા સુગન્ધિસ્સુખદર્શનઃ ॥ ૧૫૮ ॥

તીર્થં તિતિક્ષુસ્તીર્થાઙ્ઘ્રિસ્તીર્થસ્વાદુશ્શુભશ્શુચિઃ ।
તીર્થવદ્દીધિતિસ્તિગ્મતેજાસ્તીવ્રમનામયઃ ॥ ૧૫૯ ॥

ઈશાદ્યુપનિષદ્વેદ્યઃ પઞ્ચોપનિષદાત્મકઃ ।
ઈઽન્તઃસ્થોઽપિ દૂરસ્થઃ કલ્યાણતમરૂપવાન્ ॥ ૧૬૦॥

પ્રાણાનાં પ્રાણનઃ પૂર્ણજ્ઞાનૈરપિ સુદુર્ગ્રહઃ ।
નાચિકેતોપાસનાર્ચ્યસ્ત્રિમાત્રપ્રણવોદિતઃ ॥ ૧૬૧॥

ભૂતયોનિશ્ચ સર્વજ્ઞોઽક્ષરોઽક્ષરપરાત્પરઃ ।
અકારાદિપદજ્ઞેયવ્યૂહતારાર્થપૂરુષઃ ॥ ૧૬૨॥

મનોમયામૃતો નન્દમયો દહરરૂપદૃત્ ।
ન્યાસવિદ્યાવેદ્યરૂપઃ આદિત્યાન્તર્હિરણ્મયઃ ॥ ૧૬૩॥

ઇદન્દ્ર આત્મોદ્ગીથાદિ પ્રતીકો પાસનાન્વયી ।
મધુવિદ્યોપાસનીયો ગાયત્રીધ્યાનગોચરઃ ॥ ૧૬૪॥

દિવ્યકૌક્ષેયસજ્જ્યોતિઃ શાણ્ડિલ્યોપાસ્તિવીક્ષિતઃ ।
સંવર્ગવિદ્યાવેદ્યાત્મા તત્ ષોડશકલં પરમ્ ॥ ૧૬૫॥

ઉપકોસલવિદ્યેક્ષ્યઃ પઞ્ચાગ્ન્યાત્મશરીરકઃ ।
વૈશ્વાનરઃ સદખ્ભૂમા ચ જગત્કર્માઽઽદિપૂરુષઃ ॥ ૧૬૬॥

મૂર્તામૂર્તબ્રહ્મ સર્વપ્રેષ્ઠોઽન્યપ્રિયતાકરઃ ।
સર્વાન્તરશ્ચાપરોક્ષશ્ચાન્તર્યામ્યમૃતોઽનઘઃ ॥ ૧૬૭॥

અહર્નામાદિત્યરૂપશ્ચાહન્નામાક્ષિસંશ્રિતઃ ।
સતુર્યગાયત્ર્યર્થશ્ચ યથોપાસ્ત્યાપ્યસદ્વપુઃ ॥ ૧૬૮॥

ચન્દ્રાદિસાયુજ્યપૂર્વમોક્ષદન્યાસગોચરઃ ।
ન્યાસનાશ્યાનભ્યુપેતપ્રારબ્ધાંશો મહાદયઃ ॥ ૧૬૯॥

અવતારરહસ્યાદિજ્ઞાનિપ્રારબ્ધનાશનઃ ।
સ્વેન સ્વાર્થં પરેણાપિ કૃતે ન્યાસે ફલપ્રદઃ ॥ ૧૭૦॥

અસાહસોઽનપાયશ્રીસ્સહાયસ્સ શ્રિયૈ વસન્ ।
શ્રીમાન્નારાયણો વાસુદેવોઽવ્યાદ્વિષ્ણુરુત્તમઃ ॥ ૧૭૧॥

॥ ૐ ॥

ઇતીદં પરમં ગુહ્યં સર્વપાપપ્રણાશનમ્ ।

વાગીશનામસાહસ્રં વત્સ તેઽભિહિતં મયા ॥ ૧॥

ય ઇદં શ‍ૃણુયાદ્ભક્ત્યા શ્રાવયેદ્વા સ્વયં પઠત્ ।
નાસૌ પ્રાપ્નોતિ દુરિતમિહામુત્ર ચ કિઞ્ચન ॥ ૨॥

તદિદં પ્રજપન્ સ્વામી વિદ્યાધીશો હયાનનઃ ।
ક્ષત્રિયશ્ચેન્મહારુદ્રો વિક્રમાક્રાન્તસર્વભૂઃ ॥ ૩॥

મહોદારો મહાકીર્તિર્મહિતો વિજયી ભવેત્ ।
ઊરુજશ્ચેદુરુયશોધનધાન્યસમૃદ્ધિમાન્ ॥ ૪॥

અશેષભોગસમ્ભૂતો ધનાધિપસમો ભવેત્ ।
શ‍ૃણુયાદેવ વૃષલસ્સ્વયં વિપ્રાત્સુપૂજિતાત્ ॥ ૫॥

મહિમાનમવાપ્નોતિ મહિતૈશ્વર્યભાજનમ્ ।
શ્રીમતો હયશીર્ષસ્ય નામ્નાં સાહસ્રમુત્તમમ્ ॥ ૬॥

શ‍ૃણ્વન્પઠન્નપિ નરસ્સર્વાન્કામાનવાપ્નુયાત્ ।
ધર્માર્થકામસન્તાનભાગ્યારોગ્યોત્તમાયુષામ્ ॥ ૭॥

પ્રાપણે પરમો હેતુઃ સ્તવરાજોઽયમદ્ભુતઃ ।
હયગ્રીવે પરા ભક્તિમુદ્વહન્ ય ઇમં પઠેત્ ॥ ૮॥

ત્રિસન્ધ્યં નિયતશ્શુદ્ધસ્સોઽપવર્ગાય કલ્પતે ।
ત્રિઃ પઠન્નામસાહસ્રં પ્રત્યહં વાગધીશિતુઃ ॥ ૯॥

મહતીં કીર્તિમાપ્નોતિ નિસ્સીમાં પ્રેયસીં પ્રિયામ્ ।
વીર્યં બલં પતિત્વં ચ મેધાશ્રદ્ધાવલોન્નતીઃ ॥ ૧૦॥

સારસ્વતસમૃદ્ધિં ચ ભવ્યાન્ભોગ્યાન્નતાન્સુતાન્ ।
અભિરૂપાં વધૂં સાધ્વીં સુહૃદશ્ચ હિતૈષિણઃ ॥ ૧૧॥

બ્રહ્મવિદ્યાપ્રવચનૈઃ કાલક્ષેપં ચ સન્તતમ્ ।
હયગ્રીવપદામ્ભોજ સલિલસ્યાનુકૂલતઃ ॥ ૧૨॥

લભેત નિર્મલં શાન્તો હંસોપાસનતત્પરઃ ।
શ્રીમત્પરમહંસસ્ય ચિત્તોલ્લાસનસન્નિધૌ ॥ ૧૩॥

ઇદં તુ નામ્નાં સાહસ્રમિષ્ટસાધનમુત્તમમ્ ।
પાપી પાપાદ્વિમુક્તસ્સ્યાદ્રોગી રોગાદ્વિમુચ્યતે ॥ ૧૪॥

બદ્ધો બન્ધાદ્વિમુચ્યેત ભીતે ભીતિર્વિમુચ્યતે ।
મુક્તો દરિદ્રો દારિદ્ર્યાદ્ભવેત્પૂર્ણમનોરથઃ ॥ ૧૫॥

આપન્ન આપદા મુક્તો ભવત્યેવ ન સંશયઃ ।
હંસાર્ચનપરો નિત્યં હંસાર્ચનપરાયણઃ ॥ ૧૬॥

નિર્ધૂતકલ્મષો નિત્યં બ્રહ્મસાયુજ્યમાપ્નુયાત્ ।
યે ભક્ત્યા પરમે હંસે શ્રિયા મિથુનિતાઙ્ગિતે ॥ ૧૭॥

જન્મવ્યાધિજરાનાશભયભાજો ન તે જનાઃ ।
આચાર્યાત્તદિદં સ્તોત્રમધિગત્ય પઠેન્નરઃ ॥ ૧૮॥

તસ્યેદં કલ્પતે સિદ્ધ્યૈ નાન્યથા વત્સ કાશ્યપ ।
આચાર્યં લક્ષણૈર્યુક્તમન્યં વાઽઽત્મવિદુત્તમમ્ ॥ ૧૯॥

વૃત્વાચાર્યં સદા ભક્ત્યા સિદ્ધ્યૈ તદિદમશ્નુયાત્ ।
સ યાતિ પરમાં વિદ્યાં શકુનિબ્રહ્મહર્ષણીમ્ ॥ ૨૦॥

હયાસ્યનામસાહસ્રસ્તુતિરંહોવિનાશિની ।
પરમો હંસ એવાદૌ પ્રણવં બ્રહ્મણે દિશત્ ॥ ૨૧॥

ઉપાદિશત્તતો વેદાન્ શ્રીમાન હયશિરો હરિઃ ।
તેનાસૌ સ્તવરાજો હિ હંસાખ્યહયગોચરઃ ॥ ૨૨॥

વિદ્યાસામ્રાજ્યસમ્પત્તિમોક્ષૈકફલસાધનમ્ ।
સર્વવિત્સ્વાત્મભાવેન પરમં પદમાપ્નુયાત્ ॥ ૨૩॥

ન તત્ર સંશયઃ કશ્ચિન્નિપુણં પરિપશ્યતિ ।
તથાપિ સ્વાત્મનિ પ્રેમસિન્ધુસન્ધુક્ષણક્ષમઃ। ॥ ૨૪॥

ઇતીદં નામસાહસ્રં સઙ્ગૃહીતં તથોત્તરમ્ ।
એવં સઙ્ગૃહ્ય દેવેન હયગ્રીવેણ પાલનમ્ ॥ ૨૫॥

સ્તોત્રરત્નમિદં દત્તં મહ્યં તત્ કથિતં તવ ।
હંસનામસહસ્રસ્ય વૈભવં પરમાદ્ભુતમ્ ॥ ૨૬॥

વક્તું યથાવત્કશ્શક્તો વર્ષકોટિશતૈરપિ ।
હયાસ્યઃ પરમો હંસો હરિર્નારાયણોઽવ્યયઃ ॥ ૨૭॥

કારણં શરણં મૃત્યુરમૃતં ચાખિલાત્મનામ્ ।
સત્યં સત્યં પુનસ્સત્યં ધ્યેયો નારાયણો હરિઃ ॥ ૨૮॥

સમાનમધિકં વેદાન્ન દૈવં કેશવાત્પરમ્ ।
તત્ત્વં વિજ્ઞાતુકામાનાં પ્રમાણૈસ્સર્વતોમુખૈઃ ॥ ૨૯॥

તત્ત્વં સ પરમો હંસ એક એવ જનાર્દનઃ ।
ઇદં રહસ્યં પરમં મહાપાતકનાશનમ્ ॥ ૩૦॥

ન ચાશુશ્રૂષવે વાચ્યં નાભક્તાય કદાચન ।
નાપ્યન્યદેવતાયાપિ ન વાચ્યં નાસ્તિકાય ચ ॥ ૩૧॥

અધીત્યૈતદ્ગુરુમુખાદન્વહં યઃ પઠેન્નરઃ ।
તદ્વંશ્યા અપિ સર્વે સ્યુસ્સમ્પત્સારસ્વતોન્નતાઃ ॥ ૩૨॥

ઇતિ હયવદનાનનારવિન્દાન્મધુલહરીવ નિરર્ગલા ગલન્તી ।
જગતિ દશશતીતદીયનામ્નાં જયતિ જડાનપિ ગીર્ષુ યોજયન્તી ॥ ૩૩॥

॥ ઇતિ શ્રીહયગ્રીવસહસ્રનામસ્તોત્રં સમ્પૂર્ણમ્ ॥

Proofread by DPD, NA

*hayagrIvasahasranamastotram*
pdf was typeset on December 22, 2023

Please send corrections to *sanskrit@cheerful.com*